# MT

Seat No. | | | | | | | |

2018 .... .... 1100

**MT - SANSKRIT COMPOSITE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - I**
**PAPER - I**

**Time : 2 Hours** **(Pages 8)** **Marks : 50**

---

## प्रथमः विभागः - सुगमसंस्कृतम् ।

**प्र.१ अ) चित्रं दृष्ट्वा नामानि लिखत । (५ तः ४)** ४

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| १ |  | २ | तिन्त्रिणी  | ३ |  | ४ |  | ५ |  |
| | | | | | | | | | |

**प्र.१ आ) सङ्ख्याः अक्षरैः अङ्कैः वा लिखत । (३ तः २)** २

१. पञ्चाशत् - २. ६१ -

३. अष्टाशीतिः -

**प्र.१ इ) स्तम्भमेलनं कुरुत । (५ तः ४)** २

| | अ | ब |
|---|---|---|
| १. | पञ्चाधिक - त्रिवादनम् | ०४:५० |
| २. | सार्ध - सप्तवादनम् | ०८:४५ |
| ३. | दशोन - पञ्चवादनम् | ०३:०५ |
| ४. | सपाद - द्वादशवादनम् | ०७:३० |
| ५. | पादोन - नववादनम् | १२:१५ |

**प्र.१ ई) वासर - तालिकां पूरयत । (केऽपि २)** २

| ________ रविवासरः | → | श्वः ________ | → | ________ मङ्गलवासरः |
|---|---|---|---|---|

## द्वितीयः विभागः - गद्यम् ।

**प्र.२ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

एकस्मिन् दिने शङ्करः स्नानार्थं पूर्णानदीं गतः । यदा सः स्नाने मग्नः तदा तत्र एकः नक्रः आगतः । नक्रः झटिति तस्य पादम् अगृह्णात् । तदा शङ्करः उच्चैः आक्रोशत् । ''अम्ब ! त्रायस्व । नक्रात् त्रायस्व !'' आक्रोशं श्रुत्वा नदीतीरं प्राप्ता आर्याम्बा पुत्रं नक्रेण गृहीतमपश्यत् । भयाकुला सा अपि रोदनम् आरभत । शङ्करः मातरम् आर्ततया प्रार्थयत - ''अम्ब, इतः परम् अहं न जीवामि । मरणात् पूर्वं संन्यासी भवितुम् इच्छामि । अधुना वा देहि अनुमतिम् ।'' चेतसा अनिच्छन्ती अपि विवशा माता अवदत् - ''वत्स, यथा तुभ्यं रोचते तथैव भवतु । इदानीमेव संन्यासं स्वीकुरु । मम अनुमतिः अस्ति'' इति। तत्क्षणमेव आश्चर्यं घटितम् । दैववशात् शङ्करः नक्राद् मुक्तः । स नदीतीरम् आगत्य मातुः चरणौ प्राणमत् ।

अनन्तरं शङ्करः मातरं संन्यासस्य महत्त्वम् अवाबोधयत् । संन्यासी न केवलम् एकस्याः पुत्रः । विशालं जगद् एव तस्य गृहम् । 'मातः, यदा त्वं स्मरिष्यसि तदा एव त्वत्समीपमागमिष्यामि' इति मात्रे प्रतिश्रुत्य सः गृहात् निरगच्छत् । ततः गोविन्दभगवत्पादानां शिष्यो भूत्वा सः सर्वाणि दर्शनानि अपठत् । तेभ्यः संन्यासदीक्षां गृहीत्वा वैदिकधर्मस्य स्थापनार्थं प्रस्थानम् अकरोत् ।

अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित् ।
षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात् ।।

१. **अवबोधनम् । (४ तः ३)**

क) **उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।** १

शङ्कर उच्चैः आक्रोशत् यतः .......

(अ) सः नदीजले अमज्जत् ।

(ब) नक्रः तस्य पादम् अगृह्णात् ।

ख) **कः कं वदति ।** १

''नक्रात् त्रायस्व !''

ग) **पूर्णवाक्येन उत्तरं लिखत ।** १

शङ्करः मात्रे किं प्रतिश्रुत्य गृहाद् निरगच्छत् ?

घ) **एषः गद्यांशः कस्मात् पाठात् उद्धृतः ?** १

२. **शब्दज्ञानम् । (३ तः २)**

क) **द्वे त्वान्त-अव्यये चित्वा लिखत ।** १

ख) **विशेषण-विशेष्य-मेलनं कुरुत ।** १

| विशेषणम् | विशेष्यम् |
|---|---|
| विवशा | दर्शनानि |
| सर्वाणि | माता |
| | शङ्करः |

ग) **लकारं लिखत ।** १

अम्ब! नक्रात् त्रायस्व ।

प्र.२ आ) **गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

भारतस्य दक्षिणदिशि केरलप्रदेशे आलुवा नगरस्य समीपं 'कालडि' नाम ग्रामः । सः ग्रामः पूर्णानदीतीरे वर्तते । अत्र जगद्गुरोः शङ्कराचार्यस्य जन्म ख्रिस्ताब्दे अष्टमे शतके अभवत् । तस्य पिता शिवगुरुः माता आर्याम्बा चास्ताम् । बाल्ये एव तस्य पिता शिवगुरुः दिवङ्गतः । तस्माद् मातैव पुत्रस्य पालनम् अकरोत् । पञ्चमे वयसि उपनीतः सः पठनार्थं गुरुमुपागच्छत् । तत्र वेद-वेदाङ्गानि, विविधशास्त्राणि च असाधारणवेगेन बालकोऽयम् अधीतवान् । पठनादिकं समाप्य शङ्करः गृहं प्रत्यागतवान् । गृहं प्राप्य मातृसेवाम् आरभत च । माता आर्याम्बा पुत्रस्य विवाहविषये सदैव चिन्तयति स्म । परन्तु मनसा वचसा कर्मणा च विरक्तः शङ्करः संन्यासार्थम् अनुमतिं प्रार्थयत । शङ्करस्य ऐहिकविषयेषु अरुचिं दृष्ट्वा आर्याम्बा चिन्तामग्ना जाता ।

१. **अवबोधनम् । ( ४ तः ३ )**

क) **उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।** १

१) पठनादिकं समाप्य शङ्करः ...... प्रत्यागतवान् । (गृहं / नदीं)

२) ......... वयसि उपनीतः सः पठनार्थं गुरुम् उपागच्छत् । (पञ्चमे / दशमे)

ख) **उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।** १

आर्याम्बा चिन्तामग्ना जाता यतः ..........

(अ) शङ्करः ऐहिकविषयेषु अरुचिं प्रदर्शयत् ।

(ब) शङ्करः ऐहिकविषयेषु रुचिं प्रदर्शयत् ।

**ग) पूर्णवाक्येन उत्तरं लिखत ।** १

गुरुमुपगम्य शङ्करः किम् अधीतवान्?

**घ) वाक्यं पुनर्लिखित्वा सत्यम् /असत्यम् इति लिखत ।** १

शङ्करः अतीव प्रज्ञावान् बालकः ।

**२. प्रवाहि - जालचित्रं पूरयत ।** २

(गृहं प्रत्यागमनम्, गुरुमुपगमनम्, मातृसेवा, वेद-वेदाङ्गानाम् अध्ययनम्)

शङ्करस्य -



**प्र.२ इ) गद्यांशं पठित्वा माध्यमभाषया सरलार्थं लिखत । (२ तः १)** ४

१.

(रङ्गमञ्चे - कीर्तनकारः कीर्तनं करोति, श्रोतृवृन्दः श्रवणे मग्नः ।)
कीर्तनकारः - गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धुकावेरि पृथिव्यां सन्निधिं कुरु ।।
ज्येष्ठमासे शुक्लपक्षे दशम्यां तिथौ गङ्गादशहरापर्वप्रारम्भः । अस्मिन् पर्वणि नदीपूजनं कर्तव्यम् ।
श्रोतृवृन्दः - नदीपूजनम् ? किमर्थं नदीपूजनम् ?

२.

नदी (विपाट्) - किम् ? एषः मर्त्यः माम् माता इति सम्बोधयति ?
नदी (शुतुद्री) - कथं माता न करोति साहाय्यं स्वपुत्रस्य ? साधु मानवश्रेष्ठ साधु ? किन्तु,
कच्चित् तव वंशजाः मनुजाः तवेदं वचनं विस्मरिष्यन्ति ?
विश्वामित्रः - न हि मातः, नैतत् शक्यम् । सर्वाः सरितः सुखं वहन्तु ।
सर्वे जनाः सुखिनः सन्तुः ।। (विश्वामित्रः निर्गच्छति ।)

**प्र.२ ई) माध्यमभाषया उत्तरं लिखत । (२ तः १)** २

१) शङ्करेण संन्यासार्थं कथम् अनुमतिः लब्धा ?

२) मानवानां जीवनं नदीनां साहाय्येन कथं समृद्धं जातम् ?

## तृतीयः विभागः - पद्यम् ।

**प्र.३ अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत । (५ तः ४)**

अयं न भक्तो न च पूजको वा
घण्टां स्वयं नादयते तथापि ।
धनं जनेभ्यः किल याचतेऽयं
न याचको वा न च निर्धनो वा ॥
रामाभिषेके जलमाहरन्त्या हस्तात् सृतो हेमघटो युवत्याः ।
सोपानमार्गेण करोति शब्दं ठंठं ठठं ठं ठठठं ठठं ठः ॥

**क) पूर्णवाक्येन उत्तरं लिखत ।** १

कः धनं याचते?

**ख) विशेषण-विशेष्य-मेलनं कुरुत ।** १

| | विशेषणम् | विशेष्यम् |
|---|---|---|
| १) | सृतः | युवत्याः |
| २) | आहरन्त्याः | हेमघटः |
| | | हस्तात् |

**ग) जालरेखाचित्रं पूरयत ।** १




**घ) पञ्चमी-विभक्त्यन्तपदे चित्वा लिखत ।** १

**च) सन्धिविग्रहं कुरुत ।** १

१) याचतेऽयम् - याचते + ............... ।

२) जलमाहरन्त्याः - ............... + आहरन्त्याः ।

**प्र.३ आ) श्लोकौ शुद्धौ पूर्णौ च लिखत ।** ४

१. कं ............... शीतम् ।।

२. वैद्यराज ............... च ।।

**प्र.३ इ) माध्यमभाषया सरलार्थं लिखत । (२ तः १)** २

१. षड्जमूला यथा सर्वे सङ्गीते विविधाः स्वराः ।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ।।

२. सर्वधर्मान् परित्यज्य भज मानवतां ध्रुवम् ।
एषोऽभ्युदयकृत् पन्थाः तथा श्रेयस्करोऽपि च ।।

**प्र.३ ई) माध्यमभाषया उत्तरं लिखत । (२ तः १)** २

१. 'वैद्यराज नमस्तुभ्यं' इति श्लोकं स्पष्टीकुरुत ।

२. 'रामाभिषेके' इति श्लोकं स्पष्टीकुरुत ।

## चतुर्थः विभागः - लेखनकौशलम् ।

**प्र.४ निर्दिष्टाः कृतीः कुरुत । (३ तः २)**

**अ) उपपदविभक्तेः उपयोगं कृत्वा वाक्यनिर्माणं कुरुत । (४ तः २)** २

१. अलम् →

२. कथ् →

३. गम् - गच्छ् →

४. नमः →

**आ) अनुवादं कुरुत । (४ तः २)** २

१. A boy brings a flower.

२. India is my country.

३. Animals and Birds live in forest.

४. You speak the truth.

**इ) अमरकोषात् समानार्थकं शब्दं योजयित्वा वाक्यं पुनर्लिखत । (४ तः २)** २

१. त्वं प्रजाहितदक्षः राजा ।

२. मृगः वने वसति ।

३. सुदामा श्रीकृष्णस्य मित्रम् ।

४. पादपः परोपकाराय फलति ।

## पञ्चमः विभागः - भाषाभ्यासः ।

**प्र.५ अ) पृथक्करणम् ।**

**१. नामानि सर्वनामानि च पृथक्कुरुत । (५ तः ४)** २

( यस्मिन्, सुहृदाम्, केषु, तापेन, भयात् )

| नाम | सर्वनाम |
|---|---|
| | |

**२. क्रियापदानि धातुसाधित-विशेषणानि च पृथक्कुरुत । (५ तः ४)** २

( रममाणः, धार्यते, पठतु, प्राप्तः, गर्जन्ति )

| क्रियापदम् | धातुसाधित-विशेषणम् |
|---|---|
| | |

**प्र.५ आ) निर्दिष्टाः कृतीः कुरुत । (४ तः २)**

**१) सङ्ख्या / क्रम / आवृत्तिवाचकस्य योग्यं पर्यायं चित्वा वाक्यं पुनर्लिखत । (३ तः २)** २

१. माता ............ मम युतकं प्रक्षालितवती । (द्विवारं / द्वितीया)

२. ............ महिलाः जलमाहर्तुं गच्छन्ति । (त्रीणि / तिस्रः)

३. श्रीकृष्णः देवक्याः ............ अपत्यम् । (अष्टमम् / अष्टः)

**२) समासविग्रहानां समासनामभिः सह मेलनं कुरुत । (६ तः ४)** २

| | समासविग्रहाः | समासनामानि |
|---|---|---|
| १. | प्रजाहिते दक्षः । | समाहार - द्वन्द्वः समासः। |
| २. | नीरे जायते इति । | पञ्चमी - तत्पुरुषः समासः । |
| ३. | परिवारेण सह । | कर्मधारयः समासः । |
| ४. | सर्पात् भयम् । | उपपद - तत्पुरुषः समासः । |
| ५. | कर्पूरः इव गौरः । | सप्तमी - तत्पुरुषः समासः । |
| ६. | हस्तौ च पादौ च एतेषां समाहारः । | अव्ययीभावः समासः । |

**३) समानार्थकं - विरुद्धार्थकं शब्दं लिखत । (४ तः २)** २

१. माता -            २. अल्पानि ×

३. स्मरसि ×            ४. नक्रः -

( मञ्जूषा - बहूनि, मकरः, जननी, विस्मरसि )

**४) योग्यं पर्यायं चिनुत । (३ तः २)** २

क. माता भोजनं पचति । (कर्तृवाच्यम् / कर्मवाच्यम्)

ख. त्वं संन्यासं ......... । (स्वीकरोतु / स्वीकुरु)

ग. .............. वाणी ते । (मधुरा / मधुरम्)

**शुभं भवतु ✌**